CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ओंश्रीगणेशायनमः॥ निचितमिति मृगारोद्विविधः संभोगोविप्रलंभोविरहाख्यस्तमेववर्णयन् घटकर्परनामाकविर्यो-का
१ लेकारेणाह काचिद्विरहिणीभर्तरिप्रत्रावधिमृतंवर्षाकालंनिजसखीप्रायंयातीतिज्ञात्वेः हेसारिवज्जलदेरागत्यवंश्राकाशंनि
चितंव्याप्तंछन्नमित्यर्थः॥खमिंद्रयेरवमाकाशेखसूर्यैपिप्रवर्त्तते।कीदृशैर्जलदैः प्रियहीनानांविरहिणीनांहृदयाण्यवज्रवनीभुवंदति
विदारयंतीति॰ अन्यन्नुसलिलैर्भुवियद्रजस्तन्निहितंनाशितंकर्दमकृतत्वात् नकेवलंनदेवंसूर्यंचद्रावपिनदृष्टौदुर्दिनत्वात् का
चिद्विरहिणीप्रावृट्कालंज्ञात्वोक्तप्रियसखीचालोक्यदेसखिप्रावृडपिप्रकृतावल्लभोनायातइत्युक्तवती १ हंसाइति कुंदै

निचितंखमुपेत्यनीरदैः प्रियहीनाहृदयावनीरदैः शलिलैर्निहितेरजःक्षितौरविचन्द्रावपिनोपलक्षितौ॥ १॥
हंसानदन्त्येघभयाद्भवंतिनिशासुखद्योतिघनेचंद्रवंति नवाम्बुमत्ताःशिखिनोनदंतिमेघागमेकुंदसमानदंति॥ २॥

सुल्पादेतायस्याःसातत्संवृद्धैहेकुंदसमानदंति॰ मेघानांज्ञागमेप्रावृषिमदलाःपलायंतेकस्मान्नदन्मेघभयान्नदंतोगर्जंतोयें
मेघास्तेभ्योभयात्प्रावृषिहंसामानससमायांतीतिस्थिति॰ किंचघनिशासुखानिप्रद्योताःनचन्द्रवंतिचन्द्रयुक्तानसंति॰ दुर्दिनमे
वहेतुःकिन्त्वमयूराःनदंतिकेकांकुर्वंतिकीदृशाःनवाम्बुमत्ताःनवंयेवुजलंतेनहृष्टाइत्यर्थः मेघागमेइतिसर्वत्रयो
ज्यम्॰ अद्यसखिमेघाःसमायांतिपरंतुवल्लभोनायातइतिभावः विरहिणीनांमेघागमस्यातीदुःखकरत्वात्सूचयति २॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मेघावृतमिति हेलारहितनिशिरात्रौ अम्बुद्यआकाशंनभातिनराजते कीदृशंनभः यतोविताराविगताडुपानियस्मात् यतोमेघकृतं। किञ्चनिद्राचहरिंअधोक्षजेअभ्युपेति कीदृशंहरिं सुखसेवितारं सुखेनसेवितानिद्रायेनतम् कीदृशंनभःमेघैरावृतंमेघा वृतमितिनस्तुरत्रः नभातीत्यत्रभादीप्तावित्यस्यलटिरूपम् नभइतिसकारोनः ल्कीवेप्रथमानः यद्वासुखंसेवतेइति सुखसेवितानम्सुखिनमित्यर्थः वेरसेवनेइत्यस्मात्क्त। यतोविष्णुर्जलशायीप्रोच्यते हरिर्वर्षाकालेनिद्रांआगछतिकि अजलदःइभानांहस्तीनांसंरम्भंआवहतिउत्पादयति किंकुर्वन्नरसन्शब्दयन् किंभूतानांभानांपर्वतनुल्यानां कीदृ

मेघावृतंनिशीनभातिनभोविताराम् निद्राभुपेतिचहरिंसुखसेवितारम् ॥सेंद्रायुधाअजलदोधरसान्वि ध।
भानांसंरम्भमावहतिभधरसान्निभानाम् ३ सनडिज्जलदार्पितंनगेषुसनद्धोधरभीतपन्नगेषु।
परिधीररवंजलदेषुप्रपतत्यद्भुतरूपसुन्दरीषु ४

शोजलदसेंद्रायुधइन्द्रायुधेनसहवर्त्तनइतिसेन्द्रायुधः एतत्सर्वंयातंपरंतुसमवलभोनायातः ३ सनडिदिति ज
लंप्रपतति केषुनगेषुपर्वतेषु कीदृशंजलंसनडिज्जलदार्पितं तडितासहवर्त्ततेइतिसतडित् तडित्सौदामिनीविद्यु
च्चंचलाचपलावपीत्यमरः सचासौजलदःतेनार्पितंदत्तम् कीदृशेषुनगेषुभीतपन्नगेषुःसनंतोगर्जतश्चयेभोधरास्ते
भ्योभीताःसर्पायेषुतेषु कीदृशंजलं परिधीररवं परिसमंतात्धीरोगंभीरोरवोयस्यतत् कासुदरीषुगुहासुकीदृ
शीषु अद्भुतरूपासुन्दर्योयासुताषु ॥४॥ ॥४॥ ॥४॥ ॥४॥ ॥४॥ ॥४॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



नीलेति ॰ अतिभाति अतिशोभते · किंनीलं नीलं च शष्पं च नीलशष्पं नीलत्वगुण · कथंभूतं नीलशष्पं कोमलं · नकेवलं नीलशष्पं भाति
चातकोपि वारिजलेविन्दति · किंभूतं वारि अमलं मलवर्जितमित्यर्थः · अपि च मेघैर्घनैः श्रीविगणाः मयूरसमूहः विनाघते शब्दः
क्रियते · हेप्रियअत्र यस्मिन्काले मयाविनातेनवकारतिः का प्रीतिः १० मेघेति · यस्मिन्काले कलाः किंचिन्तेयेषांते कलापिनोम
यूराः किंभूताः प्रेषिता गता भर्तृका यासांता सोहृदयं उरस्तत्र शोकलापिनः शोकयुक्ताः तोयदागमकृशा वर्षाकाले दुर्बलाः केनाव

पीड़ने=

नीलशष्पमतिभाति कोमलं वारिविन्दति च चातकोमलम् अंबुदैः श्रीविगणो विनाघते कारतिः प्रियमया
विनाघते १० मेघशब्दमुदिताः कलापिनः प्रोषिता हृदयशोकलापिनः तोयदागमकृशा साघते दुर्दिनेन
मदनेनसाघते ११ किंकृपाः पितवनास्तिकानोयापांडुगंडपतितालकान्तया शोकसागरजलेऽघ
पातितांत्वहुणस्मरणमेवपातिताम् १२

ब
अधिकरणाऽधि
करणयोः

साघते · मदनेन · किंविशिष्टेन दुःसहेनेत्यर्थः ११ किंकृपेति हेमेधाः तंपथिकं यूयंब्रूत · हेपथिक कृपादयायितेनवि
घते · कयासह · कांतयाप्रोषितासह किंभूतया पांडुगंडपतितालकांतया पांडूतौगंडौकपोलौतयोः पतिताः अलकांताः कुटि
लकेशाः यस्याः सादृशीलकान्ताः अन्यन्तुतहुणस्मरणमेव पातिताम् अन्योजीवनोपायोनास्तीत्यर्थः कीदृशांतां
शोकसागरजलेअघवर्षासुपातिताम् निमग्नाम् १२ ॥ ॥ ॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



कुसुमितेति हेमेघा नंपथिकंप्रयंवृत हेप्रिय अस्मिन्वर्षाकालेमोकिमिनिनसमवेक्षसे कीदृशीमांदीनांकृपणं केवुकाननेषु की दृशेषुकुसुमितकुटजेषु कुसुमितानिकुटजानियेषुतेषु पुनःकीदृशेषु प्रियेरहिताःप्रियरहिताःप्रियरहिताविद्येते येषुतेषु अत्रशीग्रायच् पुनःकीदृशेषु ससुस्कानिआननानियेषुतेषु नकेलंतथाविधेषु किंतुनदीनांजलेवहतिस ति कीदृशेजले कलुषेअप्रसन्ने ईदृशेकालेदीनांनांकिमिनिनसमवेक्षसेहेभावः १३ मार्गेष्विति हेसखिकदा जहां सजेयं किंप्रियवियोगशोकेनाहं। प्रियोवल्लभस्तस्यवियोगोविरहस्तस्माज्जातः प्रियवियोगजःसचासौशोक दाहश्चप्रियवियोगजशोकदाहस्तेन किंविशिष्टाहं गंभीरमेघरसितव्यथिता गंभीरंचतन्मेघरसितंचतेनव्यथिता पीडिता कुसुमितकुटजेषुकाननेषुप्रियरहितेषुससुस्काननेषु वहतिचकलुषजलेनदीनांकिमितिचमांसमवेक्षसेन दीनाम् १३ मार्गेष्वमेघसलिलेनविनाशीतेषुकामोधनुःस्पृशतितेनविनाशीतेषु गंभीरमेघरसितव्यथिताक दाहंजहांसखिप्रियवियोगजशोकदाहम् १४ सुरभिवनविविधाजितानांस्वनदंभोधरवातवीजितानां.सदन स्यकृतेनिकेतनानांप्रतिभांत्यधवनानिकेतकानाम् १५ केषुसत्सुमार्गेषुपथिषुविनाशीतेषुविनाशंगतेषुस त्सु केनमेघसलिलेनमेघानांसलिलेनेत्यन्वयः कामःचापंस्पृशति चालयति कथंभूतंधनुःशीतेषु शीतास्तीक्ष्णाइष वोबाणायेषुतत् कथंविनातेनवल्लभेनविना वर्षाकालेबलवान्कामः १४ सुरभीति अधअस्मिन्वर्षाकालेवनानि प्रतिभांति केषांकेतनानांकेतकानां किंभूतविधाजितानां विशेषेणदीप्तिमतां पुनःकिंभूतस्वनदंभोधरवातवीजितानां अंभोजलं धारयतीत्यंभोधराःस्वनंतोयेंभोधरास्तेषांवातःसमीरस्तेवीजितानांकंपितानां पुनःकिंभूतनिकेतनानांगृहाणां कस्यकृते

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



तत्साधुरिति हेकामनिवाससर्ज्ज त्वांसुतंयत्ससर्ज्जस्रष्टवान्कः प्रजापतिः स्रष्टातत्साधु शोभने निर्वैनं निवासः आश्रयः कामस्यनिवासः सचात्वांससर्ज्ज अत्र सर्ज्जावृक्षविशेषः किंभूतस्ते प्रवरः प्रधानः केषांमध्येवनानां काभिः वृक्षा प्रवरः मंजरीभिः कुसुमितलताभिः नकेवलंमंजरीभिः प्रवरः किंतु नेत्रोत्सवश्चासि नेत्राणामुत्सवः नेत्रोत्सवः केषांसयौवनानां सहयौवनेनवर्त्तन्तेइतिसयौवनास्तेषां सर्ज्जकुसुमानितरुणानांतोषकरणीभवतीत्यर्थः १६ नवकृतिं हेनवकदंब नेशीरसाप्रणीतास्मि चरणेनिशेषः कुतः कारणात्तेनवकुसुमितपुष्पेषुधिकस्तिपुष्पेषुमदे

तत्साधुयत्त्वांसुतंससर्ज्जप्रजापतिः कामनिवाससर्ज्ज त्वंमंजरीभिः प्रवरोवनानांनेत्रोत्सवश्चासिसयौवनानाम् १६ नवकदंवलीरेवनतास्मितेवसतिंतेमदनः कुसुमस्मितेकुटजकिंकुसुमैरुपहस्यते १७ नरु वरविनितास्मितेसदाः हृदयंमेप्रकरोषिकिंसदाहन्त नवकुसुमानिरीक्षणेऽपदेहृविसृजेयंसहसैवनीथ

नःकामःवसतिसुकुमएवास्मितेहसितंकुसुमास्मितेनास्मिन् अन्यत्कुटजकिंअवहस्यते कैःकुसुमैःमनःतेनवनिपतिता स्मिचरणेतिशेषः कथंभूतस्यातिदुःप्रसहस्य अतिशयेनदुःखेनप्रसह्यतेअतिदुःप्रसहस्तस्य कुटजः प्रावृषिदुःसहो भवति १७ नरुवरेति हेनरुवर हेनीय नवसदासर्वदाः हृविनितास्मिएवंविज्ञायममहृदयंकिसदाहंकरोषि यत्तत्व निरीक्षणेअपदेअस्तोवदेहंपुःअहंविसृजेयंत्यजेयं कथंसहसाहृतादेव एतेनकिमुक्तंभवतियथावर्षाकालेकुटजादयोविरहिणीनांअतिदुःसहाभवंतीति १६

निपतितास्मिसुदुःप्रसह्यतेभुज

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



कुसुमैरिति भ्रमरश्रुवन्ति आस्वादयन्ति कोयष्टिकालतां रक्तावेव लतां कीदृशीं उपशोभितां कैः कुसुमैः पुष्पैः कीदृशैः श्रीतैः पुनः किंभूतैः घनसृक्कावुल्लवप्रकाशितैः किंकृत्वा समवेत्य दृष्ट्वा का कालतां समयतां अवसरं कस्य मधुनः वसंतस्य १७ तासामिति हे मेघाः तेषु केषु यूयं यूत तेत्राह याः स्त्रियः रत्नुत्सवे प्रियतमैः सहमानयंति भजंति कस्मिन्काले मेघागमे केषु दिनेषु कथंभूतेषु सेंद्रायुधावुधारगर्जितदुर्दिनेषु इंद्रस्यायुधं इंद्रायुधं इंद्रायुधेन सहवर्तते इतिसेंद्रायुधः सचासावंबुधरश्च तस्यगर्जितंयेषु तेषु नकेवलं स्वयमेवसमानयंति प्रियसखीश्चसमानयंति तुल्याः

कुसुमैरुपशोभितां शीतैर्घनसृक्कावुल्लवप्रकाशितैः मधुनासमवेत्यकालतां भ्रमरश्रुवन्तिपृथिकालताम्
१७ तासामनुःसफलएवहियादिनेषुसेंद्रायुधावुधारगर्जितदुर्दिनेषु रत्नुत्सवेप्रियतमैःसहमानयंति
मेघागमेप्रियसखीश्चसमानयंति २० एतन्निशम्यविरहानलपीडितायास्तस्यावचःखलुदयालुरपी
डितायाः संलापवेणकथिंतजलदैरमोघैः प्रत्याययौसगरहृन्नदिनैरमोघैः २१ भावानुरक्तवनितासु
रतैःशपेथमालभ्यचांघ्रिपतितःकरकोशपेयम् जीवेयंयेनकविनायमकैःपरेणतस्मेवहेयमुरुकं घटकर्परेण २२

कुरुनु तासांऋनुःसफला २१ भावानुरक्तिमिति येनपरेणकविना यमकैरहंजीवेय तस्मेघटकर्परोद्दकं
ऋहंवहेयम् तस्यकिंकरोमवेयामित्यर्थः। ऋहंनैवजीवेयं एतद्दृढीकरणार्थंसपथद्वयमाहकविः। भावानुरक्तवनि
तासुरतैः शपेथं सभावेनैवऋनुरक्ताचासौवनिताचतस्यांविषासक्तःकरकोशपेयंघ्रंघ्रिजलंऋालभ्यशपथंकृति
श्रीघटकरपरेणकृतं घटकर्परसंकाव्यटीकेसमाप्तम्॥ ॥ श्रः॥ ॥ ॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi